# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – १ | |
|---|---|---|
| विषयः – अनिवार्यसंस्कृतम् | (C.F.-3.5.5.New) | गुणाः – ७० |
| दिनाङ्कः – ०४/१२/२०१८ | *सन्दर्भग्रन्थः– वेदान्तसारः* | समयः –१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत ।** **( १० )**

*(१) अखण्डं सच्चिदानन्दमवाङ् मनसगोचरम् ।*
*आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ इति श्लोकं व्याख्यात।*

*(२) वेदान्ताध्ययनस्याधिकारिणः लक्षणानि प्रतिपादयत।*

*(३) नित्यनैमित्तिककाम्यनिषिद्धकर्माणि यथाग्रन्थं निरूपयत।*

**प्रश्नः २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत ।** **( १० )**

*(१) समष्टिव्यष्ट्यज्ञानस्वरूपं निरुपयत।*

*(२) अज्ञानस्य शक्तिद्वयं यथाग्रन्थं प्रतिपादयत।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत ।** **( १० )**

*(१) वेदान्तदर्शनरीत्या आत्मस्वरूपं निरूपयत।*

*(२) सूक्ष्मशरीरस्यावयवान् स्पष्टं विवेचयत।*

*(३) चतुर्विधस्थूलशरीरं विशदयत।*

**प्रश्नः ४ निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखत ।** **( १० )**

*(१) पञ्चीकरणप्रक्रियां निरूपयत।*

*(२) 'तत्त्वमसी'तिवाक्यस्य अण्डार्थबोधकत्वं प्रतिपादयत।*

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत ।** **( १० )**

*(१) स्थूलसूक्ष्मकारणप्रपञ्चं विचारयत।*

*(२) अपवादस्वरूपं निरूपयत।*

*(३) समाधेः साधनभूतयमाद्यङ्गानां स्वरूपं व्याख्यात।*

**प्रश्नः ६ निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया लिखत । (१०)**

*(१) जीवन्मुक्तलक्षणं यथाग्रन्थं विशदीकुरुत।*

*(२) महावाक्यार्थबोधं यथाग्रन्थं प्रतिपादयत।*

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु । (१०)**

*(१) वेदान्तो नाम कः?*

*(२) वेदान्तसारः केन रचितः?*

*(३) वेदान्तसारग्रन्थस्य प्रयोजनं किम्?*

*(४) अध्यारोपः कः?*

*(५) वायुपञ्चकं किम्?*

*(६) मनसः स्वरूपं किम्?*

*(७) स्थूलभूतानि कानि?*

*(८) 'तत्त्वमसी'ति कीदृशं वाक्यम् ?*

*(९) प्राणायामाः के?*

*(१०) जृम्भणकरः कः?*

*(११) दमः इत्युक्ते कः?*

*(१२) निषिद्धकर्माणि कानि?*

*(१३) विद्यया कः लोकः भवति ?*

*(१४) बुद्धिः ज्ञानेन्द्रियैः सहिता. . . . . .कोशो भवति।*

*(१५) अनुभववाक्यं किम् ?*

--oo--